# PREFACE.

Udayavarmacaritam, occurring in Kolarāṣṭravarṇana, an episode in Keraḷamāhātmya, the context being the consecration of several divinities and Brahmins in the land of Keraḷa, is dialogued as one between a Dvija and a Sūta, to pass for a legend. The King Udayavarman invited Brahmins from afar, bestowed on them rich presents to the chagrin of the indigenous Brahmins who turned hostile towards him, to absolve himself of the sin of the slaughter of Brahmins in battle and thus caused the land of Keraḷa to overflow with Brahmin community. The succeeding verses,

"'कोळम्बाब्दे क्षमाखने' . .

(पृ. ७. श्लो. ६९.)

ततो बहुतिथे काले गते कोळम्बवत्सरे ।
वचोरत्ने कुम्भमासे सौरेऽह्नि सुरगायक ! ॥"

(पृ. ८. श्लो. ७५.)

"कोळम्बाब्दे भातिरत्ने कुम्भमासे सुरेऽहनि ।
विद्यारण्ययतीन्द्रश्च षोडशग्रामिणो द्विजाः ॥"

(पृ ९. श्लो. ९१.)

disclose the date of that event as the latter half of the 11th century thereby bringing the time of a certain Vidyāraṇyayati close to that period. The lines below:

'तदा त्रिग्रामिणो विप्राः प्राप्य माधवपण्डितम् ।'

(पृ. ५. श्लो. ४३.)

"तद् दृष्ट्वा महदाश्चर्यं स्तुत्वा माधवपण्डितम् ।
माधवाचार्य इत्यासीद् व्योम्नि वागशरीरिणी ॥"

(पृ. ५. श्लो. ४९.)

betoken that Vidyāraṇya must have been a different appellation of Mādhavācārya. Be that as it may, a doubt may crop up as to whether he was the same Mādhavācārya of the 14th century A. D., to whom Sarvadarśanasaṅgraha, Dhātuvṛtti and Ṛgbhāṣya owe their origin, or another individual of that denomination who must have flourished earlier than the former. Mahākavi Rao Sāhib Uḷḷūr S. Parameśvara Aiyar holds the view that another Udayavarmacarita, a Sanskrit composition consisting of 11 chapters originated from the pen of one Ravi Varmā, the celebrated King of Kola Kingdom in the 8th century. 'वृद्धिदाम्बा' in the text determines the date of Udayavarmā as the latter

half of the 8th century. Again the term 'तुङ्गो धूली' lends support to the belief that this land was blessed by the universal preceptor — the great Saṅkarācārya of world-wide repute. But others do not see any connection between Vidyāraṇya-yatīndra *alias* Mādhavapaṇḍita who showered his choicest blessings on Udayavarmā and hence the conjecture, in consonance with the chronogram *Vacoratna* suggestive of the Malabar Era, that Udaya Varmā of the latter half of 11th century, the hero of this production, could never be contemporaneous with Mādhavācārya, otherwise known as Vidyāraṇya of the 14th century. Thus both the views are illogical. The eminent research workers on ancient history have made startling discoveries towards this end. Some shreds of evidence are plausible in this work to fix the date of one Mādhavācārya, in or about the 8th century A. D. A discussion has been attempted in the following verse :

"स्कन्दस्वामी नारायण उद्गीथ इति ते क्रमात् ।
चक्रुः सहैकमृग्भाष्यं पदवाक्यार्थगोचरम् ॥"

One Mādhavapaṇḍita, son of Nārāyaṇa, the commentator on Sāmaveda is proved to have been devoutly attached to the King Udayavarmā, from the facts that Nārāyaṇa, the contemporary of Skandasvāmin was his father and that he was a compatriot of Hariharasvāmin of the 8th century, a disciple of Skandasvāmin and a commentator on Śatapatha Brāhmaṇa. However, this theory is acceptable till it is refuted by contrary evidence. Somehow he must have won the title of Vidyāraṇya since one's period of existence is not a criterion for one's celebrity. Notwithstanding these contradictions, an ancient historical treatise of this stamp should never pass unnoticed.

A clear evidence furnished by the following lines:

"वल्लभेशार्चनाद् ग्राम-
त्यागाच्चैते हि देशिनः ।"

(पृ. १९. श्लो. १२४.)

may be advanced from the text to show that Brahmins styling themselves Embrāntiris made this place their permanent habitation. Several eminent poets basing their arguments on similar facts adduced from this work ascribe its authorship to a Brahmin of Tiruvalladeśa as is evident from the following stanza :

"श्रीमत्कोलक्षितीशोदयनृपचरितं देशिकानीतिरूपं
तद्वंश्येनात्र केनाप्यभिहितमतिविस्तीर्णमध्याययुग्मम् ।"

(पृ. १६. श्लो. १०.)

Again the closing Khaṇḍa and the introductory verse:

"श्रीराघवं प्रणम्याहं कुशाध:क्षेत्रवासिनम् ।
कोलभूपोदयोदन्तं ब्राह्मणस्थापनं ब्रुवे ॥"

(ख. १. श्लो. १.)

bear out that he was a poet belonging to कुशाधक्षेत्र (Cerutālattu). The Mahākavi also subscribes to this view. Some believe that he might be another Brahmin hailing from Tiruvalla. References to many places and individuals are noticed in the course of the work.

The unique original manuscript used for this publication belongs to the revered Kēśava Valiattān, a native of Tiruvalla in Travancore, to whom I extend my heartfelt thanks. I have great pleasure in presenting this work to the enlightened public.

Trivandrum,<br>4-2-1113.

K. SĀMBAŚIVA ŚĀSTRĪ.

UNIVERSITY LIBRARY
25 DEC 1945
MADRAS.

॥ श्रीः ॥

# निवेदना ।

इदम् उदयवर्मचरितं किमप्यन्यतममङ्गं श्रीकेरलमाहात्म्यस्य, यत् कोलराष्ट्रवर्णने प्रकृतं देवब्रह्मप्रतिष्ठाधिष्ठितं पुराणच्छायामापादयितुं द्विजसूत-संवादमर्यादया संगुम्फितम् । अयमत्र चरितसंग्रहः परिसमाप्तौ दशश्लोक्या सूचितः । युद्धे ब्रह्महत्यया ग्रस्तस्य उदयवर्मणो राज्ञस्तत्परिहाराय विदेशाद् ब्राह्मणानानाय्य स्वदेशाचारेण तानभ्युपगत्य स्वदेशीयब्राह्मणैरनभ्युपेतस्य तत्तद्दानस्य प्रतिग्राहणं, ततो मुक्तस्य शुद्धस्य च चिरायुषावस्थानं, कालेन प्रवहता तेषां विदेशीयानां ब्राह्मणानामिह केरलक्षेत्रेषु पूजकतया प्रतिष्ठापनं चेत्यसौ तस्यापि सङ्ग्रहस्य कोऽपि सङ्ग्रहः समर्प्यते ।

'कोळम्बाब्दे क्षमाखने'

(पृ० ७. श्लो० ६९.)

"ततो बहुतिथे काले गते कोळम्बवत्सरे ।
वचोरत्ने कुम्भमासे सौरेऽह्नि सुरगायक ! ॥"

(पृ० ८. श्लो० ७५.)

कोळम्बाब्दे भातिरत्ने कुम्भमासे सुरेऽहनि ।
विद्यारण्ययतीन्द्रश्च षोडशग्रामिणो द्विजाः ॥

(पृ० ९. श्लो० ९१.)

इत्यादिभिः सम्भवोऽयं क्रिस्त्वब्दीयैकादशशतकस्योत्तरार्धे सम्पन्न इत्यूह्यं भवति । कश्चन विद्यारण्ययतीन्द्रश्च तदात्वे प्रतिपत्तव्यो भवति ।

"तदा त्रिग्रामिणो विप्राः
प्राप्य माधवपण्डितम् ।"

(पृ० ५. श्लो० ४३.)

'तद् दृष्ट्वा महदाश्चर्यं स्तुत्वा माधवपण्डितम् ।
माधवाचार्य इत्यासीद् व्योम्नि वागशरीरिणी ॥

(पृ० ५. श्लो० ४९)

इत्यादिभिः स च विद्यारण्यो माधवाचार्यापरपर्यायः सम्पद्यते । सत्येवं सोऽयं माधवाचार्यः सर्वदर्शनसङ्ग्रहधातुवृत्तिऋग्भाष्यादिबहुनिबन्धकर्ता श्रीसायणमाधवाचार्यो वान्यो वेति शङ्कायां क्रिस्त्वब्दीयचतुर्दशशतकजीविनः सायणमाधवाचार्यादन्य एव सम्भाव्यः, कल्प्यो वा कश्चिदन्योऽपि विद्यारण्यनामा माधवपण्डितस्ततः प्राक् । अत्र विषये महाकवि-रावुसाहिब् श्रीपरमेश्वरार्या एवं मन्यन्ते — अस्ति किमपि संस्कृतकाव्यम् उदयवर्मचरिताभिधमेकादशाध्यायीसम्मितं केनापि रविवर्मनाम्ना कोलभूपतिना क्रिस्त्वब्दीयाष्टमशतकोत्तरार्धजीविना विरचितम् । 'वृद्धिदाम्बे'ति कलिवत्सरानुगुण्येन उदयवर्मणो जीवितविजयः क्रिस्त्वब्दीयाष्टमशतकोत्तरार्धं भवति । 'तुङ्गो धूली'ति कलिसङ्ख्यामर्यादया तदात्वे श्रीमत्परमहंसपरिव्राजकजगद्गुरुश्रीशङ्करभगवत्पादाचार्येण तदनुग्रहश्च सुतरां सम्भाव्यते । परन्तु विद्यारण्ययतीन्द्रः कोऽपि माधवपण्डित इहोदयवर्मानुग्राहकः प्रतिपाद्यमानो न घटते । अतो 'वचोरत्न' इत्यादिकोळम्बवत्सरक्रमेण प्रस्तुतकृतिनायक उदयवर्मा क्रिस्त्वब्दीयैकादशशतकोत्तरार्धजीवी क्रिस्त्वब्दीयचतुर्दशशतकवर्तिना माधवाचार्येण विद्यारण्येन कथङ्कारं घटताम् । तस्मादुभयमिदमसङ्गतमित्यादि । मन्ये प्राक्तनचरित्रविज्ञानदृशा सम्यगुपकृतं महाभागैः । परन्तु क्रिस्त्वब्दीयाष्टमशतके कस्यचन माधवपण्डितस्य लगन्ती काचिदुपपत्तिस्तदंशे ग्रन्थमिमं प्रमाणं कर्तुमलमिति तत्रेदं विचार्यते —

"स्कन्दस्वामी नारायण उद्गीथ इति ते क्रमात् ।
चक्रुः सहैकमृग्भाष्यं पदवाक्यार्थगोचरम् ॥"

इति सहजीविषु भाष्यकर्तृषु अन्यतमस्य नारायणस्य सूनुः कोऽपि माधवपण्डितः सामवेदभाष्यकारः स्कन्दस्वामिसहचरनारायणपुत्रतया शतपथब्राह्मणभाष्यकर्तुर्हरिस्वामिनः स्कन्दस्वामिशिष्यस्य क्रिस्त्वब्दीयाष्टमशतकजीविनः सहचरतया च महानुभावः काममस्य उदयवर्मणः प्रसादानुग्रहकारी सम्पद्यमानो न विना प्रमाणान्तरोपमर्दं निषेधमर्हति । विद्यारण्यख्यातिश्च सम्भवदार्हन्तीप्रयुक्ता न समयविशेषजीवितामन्वयव्यतिरेकाभ्यामपेक्षते इति ।

सर्वथा प्रतियोगिमर्यादयापि प्राचीनचरितगुम्फनमेतादृशमविरलप्रशंसामर्हति ।

"वल्लभेशार्चनाद् ग्रामत्यागाच्चैते हि देशिनः ।"

(पृ० १२. श्लो० १२४.)

इत्यादिभिः तिरुवल्लादेशिनः एम्प्रान्तिरिसंज्ञिता ब्राह्मणा इह प्रतिष्ठापिता इत्यादिभागेषु नैकेषु महाकविसम्मतिरेतद्ग्रन्थप्रामाण्यमुपोद्बलयन्ती सुतरामनुग्राहिका विजयते । अस्य च खण्डकाव्यस्य कर्ता कश्चित् तिरुवल्लादेशीयो द्विजः —

श्रीमत्कोलक्षितीशोदयनृपचरितं देशिकानीतिरूपं
तद्वंश्येनात्र केनाप्यभिहितमतिविस्तीर्णमध्याययुग्मम् ।

(पृ० १६. श्लो० १०.)

इति संग्रहोपान्त्यपद्यखण्डेन,

"श्रीराघवं प्रणम्याहं कुशाधःक्षेत्रवासिनम् ।
कोलभूपोदयोदन्तं ब्राह्मणस्थापनं ब्रुवे ॥"

(पृ० १. श्लो० १.)

इति प्रतिज्ञापद्येन च कुशाधःक्षेत्र (ൈലൂതൂർ) देशवासी कोऽपि कविरिति ज्ञायते । अत्र च महाकवीनामुद्देशोऽनुकूलः । विशिष्य ते तं कविं कमप्यन्यतमं कुशाधःक्षेत्रवासिनं द्विजं च तिरुवल्लादेशीयं मन्यन्ते । अत्र च बहवो देशाः देशिनश्च नामग्राहं गृहीताः ।

अस्य चैतादृशस्य प्रसिद्धीकरणस्याधारभूत आदर्शोऽद्वितीयः श्रीवञ्चिराज्यान्तर्गततिरुवल्लाप्रदेशवास्तव्यमहामाहिमश्रीकेशववल्यत्तान्ग्रन्थालयादधिगत इति तेषु बहुमानमसमानमाकलयन् कृतज्ञतामनुस्मरंश्चरितमिदं महाजनसमक्षमवतारयामि कृतकृत्यः ॥

अनन्तशयनम्,
४-२-११३.

के. साम्बशिवशास्त्री.

ब्रह्महत्यानिवृत्त्यर्थं क्षेत्रदानादि कल्पितम् ।
लक्ष्मीग्रामादिविप्रेन्द्रा नागृह्णन् पापभीरवः ॥ १९ ॥
ततो विषण्णः कोलेशो ब्रह्महत्यार्तधीश्चिरम् ।
उवासोदयवर्मासौ विप्रानन्विष्य सुप्रभ ! ॥ २० ॥
श्रीवल्लीग्रामिणो विप्रा गण्डक्या उद्धृतं तदा ।
प्राप्ताः श्रीवल्लभे बिम्बं दिव्यं स्थापयितुं हरेः ॥ २१ ॥
गोकर्णनद्यां तन्मग्नं मध्येमार्गं विधेर्बलात् ।
नोद्धर्तुं तेऽशकन् साह्यं कर्णाटास्तावदर्थिताः ॥ २२ ॥
कर्णाटास्तौलवाश्चैते बिम्बमुद्धृत्य तं क्षणात् ।
श्रीवल्लभे स्थापयित्वा समं सम्पूज्य च स्थिताः ॥ २३ ॥
पाञ्चरात्रं च का(वा ? पा)लं विधिमादृश्य नित्यशः ।
गन्धर्व ! वल्लभेशं तं पूजयन्ति स्म चोभये ॥ २४ ॥
इडुकुञ्चिविलक्कूरगुणवत्याख्यग्रामिणः ।
श्रीवल्लीग्रामिणश्चैव पूजकाश्चोभये हरेः ॥ २५ ॥
दूतैरानाय्य तान् विप्रान् ब्रह्महत्यैनसा समम् ।
ददौ क्षेत्रद्वयं राजा तेभ्योऽसौ बहुदक्षिणम् ॥ २६ ॥
कृशाधक्षेत्रमत्रैकमर्हस्थं नाम चेतरत् ।
तेभ्योऽदाद् बहुदेवस्वं प्रामाण्यं चोदयो नृपः ॥ २७ ॥
नररत्नसमायां प्राक् कोलम्बे सागरान् द्विजान् ।
आनाय्य तेभ्यो ददिवान् क्षेत्राण्युदयभूपतिः ॥ २८ ॥
पाञ्चरात्राद्यागमोक्तविधिना पूजनाद्धरेः ।
ग्रहणाद् ब्रह्महत्यादेर्ब्राह्मणैस्ते बहिष्कृताः ॥ २९ ॥

बहिष्काराद् द्विजेन्द्राणां कर्णाटा दीनमानसाः ।
ब्रह्महत्याभिभूताश्च कोलराज्ये चिरं स्थिताः ॥ ३० ॥
नित्यानन्दमहायोगी बदर्याश्रमतस्तदा ।
शिष्यैश्चतुर्भिः सहितः कुशाधक्षेत्रमाययौ ॥ ३१ ॥
क्षेत्रान्तरे स्थितो योगी देवकार्याणि सोऽकरोत् ।
तदा निष्कासितो दुष्टैर्बहिः शिष्यैः स चाशपत् ॥ ३२ ॥
यूयं सर्वेऽपि दुर्वृत्ता देवब्राह्मणवैरिणः ।
दुर्ब्राह्मणाः कलहिनो मिथः सन्तु बहिष्कृताः ॥ ३३ ॥
एवं शप्त्वा गते तस्मिन् वृद्धाः केचन तद्विदः ।
तं नत्वा समनुज्ञाप्य शापमोक्षं ययाचिरे ॥ ३४ ॥
तेभ्यस्तुष्टः स योगीन्द्रः शापमोक्षं ददौ तदा ।
वर्षादर्वाग् दिव्ययोगी कश्चिदत्रागमिष्यति ॥ ३५ ॥
तं प्रणम्य प्रसाद्यैतद् यूयं प्रार्थयत द्विजाः! ।
मोक्षयिष्यति वः शापात् सह संयोज्य स द्विजान् ॥ ३६ ॥
इत्येषां शापमोक्षं च दत्त्वा शिष्यैः स निर्ययौ ।
दृष्ट्वा माधवभट्टस्तं सशिष्यं गृहमानयत् ॥ ३७ ॥
विधिवत् सत्कृतात् तस्मात् प्रसन्नात् स तु माधवः ।
दिव्यं स भगवद्ध्यानं मन्त्रतन्त्रादि चाग्रहीत् ॥ ३८ ॥
गतेऽस्मिन्नुत्तरामाशां तदुक्तविधिना ततः ।
भक्त्या गुणवतीनाथं सिषेवे परमेश्वरम् ॥ ३९ ॥
प्रीते गुणवतीनाथे सर्वज्ञे परमेश्वरे ।
अष्टैश्वर्यं च तस्यासीद् विद्याश्चाष्टादश स्वयम् ॥ ४० ॥

ततो वाक्कूरकक्षेत्रसभायोगं स(सा ? मा)गतः ।
मानितस्तत्र विद्वद्भिरासीन्माधवपण्डितः ॥ ४१ ॥
भूताग्रवाह्यां शिबिकामारुह्यामलकस्थलीम् ।
सङ्गच्छन् पितृपिण्डार्थी स चोदयपुरं ययौ ॥ ४२ ॥
तदा त्रिग्रामिणो विप्राः प्राप्य माधवपण्डितम् ।
न्यवेदयन् स्ववृत्तान्तं शापदानुग्रहादिकम् ॥ ४३ ॥
क्षेत्रदानं च भूयोऽपि ब्रह्महत्याप्रतिग्रहम् ।
आदातुं भूपनिर्बन्धं विशिष्यावेदयन्त ते ॥ ४४ ॥
यूयं तु ब्रह्महत्यायाः क्षेत्रस्यापि प्रतिग्रहम् ।
न गृह्णीत पुनर्विप्रा यावदागमनं मम ॥ ४५ ॥
श्रीधात्रीक्षेत्रतो गत्वा पित्र्यपिण्डार्पणात् परम् ।
मोक्षयिष्यामि वः शापाद् मा खिद्यत महीसुराः ! ॥ ४६ ॥
इत्युक्त्वामलकक्षेत्रं प्राप्य पिण्डशिलान्तरे ।
दृष्ट्वा श्वानं मृतं योगाज्जीवयन् पिण्डमप्यदात् ॥ ४७ ॥
प्राधान्यमप्यमूल्यत्वं कर्णाटानामकल्पयत् ।
तदादि तत्र हैकानां पिण्डे तदधिकारिणः ॥ ४८ ॥
तद् दृष्ट्वा महदाश्चर्यं स्तुत्वा माधवपण्डितम् ।
माधवाचार्य इत्यासीद् व्योम्नि वागशरीरिणी ॥ ४९ ॥
ततोऽस्मिन् माधवाचार्ये गते श्रीशम्बरालयम् ।
शिबिकाग्रवहौ भूतौ त्यक्त्वा तं जग्मतुर्द्रुतम् ॥ ५० ॥
पतिते शिबिकाग्रे तत्कारणं विमृशन्नसौ ।
चक्षुषा तत्र दिव्येन व्यजानात् तद्विचेष्टितम् ॥ ५१ ॥

तत्रत्यस्वकुलोद्भूतदुष्प्रतिग्रहणादिकम् ।
पुनश्च ब्रह्महत्यायाः क्षेत्रस्यापि प्रतिग्रहम् ॥ ५२ ॥
स्वकुलीनकृतं पापं स्वात्मन्यपि विबाधितम् ।
बुद्ध्वा तान् माधवाचार्यः शशापानाश्रवान् क्रुधा ॥५३॥
न राज्ञः प्रतिगृह्णीयादिति स्मृतिवचो विदन् ।
यो दुष्प्रतिग्रही मूढः स सद्यः पतति ध्रुवम् ॥ ५४ ॥
दुर्वृत्ताः सागराः सर्वे लोकोपद्रवकारिणः ।
अनुष्ठानवतां नित्यमन्तराया भवन्ति ते ॥ ५५ ॥
एतत् सर्वं समालोच्य सगरः सर्ववित् प्रभुः ।
दैवेन नाशिता दुष्टा इत्युवाचातिहर्षितः ॥ ५६ ॥
माता वा जनको वापि भ्राता वा तनयोऽपि वा ।
अधर्मं कुरुते यस्तु स एव परिशुष्यते ॥ ५७ ।
यस्त्वधर्मेषु निरतः सर्वधर्मविरोधकृत् ।
तं रिपुं परमं विद्याच्छास्त्राणामेष निश्चयः ॥ ५८ ॥
सगरः पुत्रनाशेऽपि न कदाचिच्छुशोच सः ।
दुर्वृत्तशमनं यस्मात् सतामुत्साहकारणम् ॥ ५९ ॥
इति शप्त्वा महायोगी तत्र श्रीशम्बरालयात् ।
क्रुद्धः श्रीमाधवाचार्यः कृशाधक्षेत्रमाययौ ॥ ६० ॥
तावत् स कोलभूपोऽपि तत्रत्या ब्राह्मणाश्च ते ।
अनुगम्य महात्मानं माधवार्यं ववन्दिरे ॥ ६१ ॥
बहुधा तमनुज्ञाप्य परिक्रम्य प्रणम्य च ।
दौर्ब्राह्मण्यं शापमोक्षं चासकृत् ते ययाचिरे ॥ ६२ ॥

हे राजन्! कोलभूपाल! साधुब्राह्मणवञ्चनात् ।
दुर्दानात् ते नातिचिराद् राज्यभ्रंशो भविष्यति ॥ ६३ ॥
योगीश्वरापमानाच्च तदनुष्ठानरोधतः ।
ब्रह्महत्यादिपापानां दुर्दानानां प्रतिग्रहात् ॥ ६४ ॥
दुर्ब्राह्मणा भविष्यन्ति भवन्तः सर्वनिन्दिताः ।
इत्युक्त्वा तान् द्विजान् योगी निर्गन्तुमुपचक्रमे ॥ ६५ ॥
तदानुगम्य राजा च विप्राश्च बहुशोऽपि ते ।
शापमोक्षमयाचन्त खिन्नाः सन्तोष्य सुप्रभ! ॥ ६६ ॥
गोकर्णे सत्सभायोगे समागच्छत हे द्विजाः! ।
तावत् त्वच्छापमोक्षादि समालोच्य करोम्यहम् ॥ ६७ ॥
इत्युक्त्वा तान् समाश्वास्य राजानं च स सुप्रभ! ।
गोकर्णं प्राप्य संन्यासी विद्यारण्यमुनिर्बभौ ॥ ६८ ॥
ततश्चिरगते काले कोलम्बाब्दे क्षमाखने ।
वाक्कूराख्ये महाक्षेत्रे सत्सभा मिलिताभवत् ॥ ६९ ॥
चतुष्षष्टितमग्रामब्राह्मणानां च योगिनाम् ।
राज्ञामपि महायोगः संबभूव महात्मनाम् ॥ ७० ॥
विद्यारण्ययतीन्द्रस्तु संसद्यग्रासनस्थितः ।
तत्र तावन्नृपो विप्राः शापमोक्षं जिघृक्षवः ॥ ७१ ॥
महाजनैः सम्मिलितां सभां सम्प्राप्य सादरम् ।
पूर्ववत् प्रणिपत्यैतान् शापमोक्षं ययाचिरे ॥ ७२ ॥
श्रुत्वा तद्वचनं ++ समालोच्य सभासदः ।
गोकर्णाख्ये महाक्षेत्रे सभायां प्राप्तुमादिशन् ॥ ७३ ॥

सभायां निर्गतायां तु कोलभूपश्च ते द्विजाः ।
खिन्नाः सुप्रभ! सर्वेऽपि प्रतिजग्मुर्यथागतम् ॥ ७४ ॥

ततो बहुतिथे काले गते कोलम्बवत्सरे ।
वचोरत्ने कुम्भमासे सौरेऽह्नि सुरगायक! ॥ ७५ ॥

गोकर्णाख्ये महाक्षेत्रे सङ्गतासीन्महासभा ।
तत्र पूर्वोक्तवद् राजा विप्रास्ते च समाययुः ॥ ७६ ॥

चतुष्षष्टितमग्रामब्राह्मणाश्च यतीश्वराः ।
राजानश्च महात्मानस्तत्राभूवन् सभासदः ॥ ७७ ॥

महासभान्तरं प्राप्य प्रणिपत्य सभासदः ।
शापमोक्षाधयाचन्त पुनःपुनरपि द्विजाः ॥ ७८ ॥

राज्ञश्च शापदुष्टानां विप्राणां च निवेदनम् ।
श्रुत्वा सभासदः सर्वे समालोच्यैवमब्रुवन् ॥ ७९ ॥

ख्यापनेनानुतापेन प्रशस्ताध्ययनेन च ।
पापकृन्मुच्यते पापात् तथा दानेन चापदि ॥ ८० ॥

इति स्मृतिवचो विप्रान् श्रावयित्वा यथाविधि ।
परिषत्ख्यापनं सानुतापं चित्तमकारयन् ॥ ८१ ॥

चतुर्वेद(ः?)स्वाध्ययनं सभ्या(सै साध्य ? स्तैः साध्व)कार-
[यन् ।
दानानि शास्त्रदृष्टानि पापनिर्मोचनानि च ॥ ८२ ॥

इत्थं निष्कृतिनिर्दोषैर्ब्राह्मणैस्तैरयोजयन् ।
शुद्धान् विप्रोत्तमानन्यान् सकुटुम्बान् सभासदः ॥ ८३ ॥

सप्तत्रिंशाधिकशतद्वयसङ्ख्यैश्च सागरैः ।
चत्वारिंशाधिकशतद्वयसङ्ख्यान् द्विजान् वरान् ॥ ८४ ॥

संयोज्य नवरत्नाख्यान् सकुटुम्बान् सभासदः ।
कृतार्थयित्वा राजानं विप्रांश्चाप्रीणयन्नमून् ॥ ८५ ॥
सप्तसप्तत्यधिकया चतुःशत्या द्विजोत्तमैः ।
पूर्वस्माच्छुशुभे राजा कोलेशः सत्सभाख्यया ॥ ८६ ॥
विशेषविद्भिस्तत्त्वज्ञैः सर्वमालोच्य तत्त्वतः ।
सागरे नवरत्नं च योजनीया च सत्सभा ॥ ८७ ॥
त्रिग्रामिणः सागरास्ते चतुर्दशगृहा द्विजाः ।
त्रयोदशग्रामिणोऽन्ये नवरत्ना दशौकसः ॥ ८८ ॥
यजुर्वेदविदः सर्वे बौधायनिकसूत्रिणः ।
षोडशग्रामिणोऽप्येते कर्णाटा हैकका मताः ॥ ८९ ॥
महाबलस्य गोकर्णमहाक्षेत्राधिवासिनः ।
सन्निधौ सत्यमकरोत् सत्सभेयं सभान्तरे ॥ ९० ॥
कोलम्बाब्दे भातिरत्ने कुम्भमासे सुरेऽहनि ।
विद्यारण्ययतीन्द्रश्च षोडशग्रामिणो द्विजाः ॥ ९१ ॥
कोलभूपोऽन्यभूपाश्च नानादेशमहाजनाः ।
गोकर्णाख्ये महाक्षेत्रे तत्र सम्मिलिता सभा ॥ ९२ ॥
सर्वे वयममी नित्यं श्रौतस्मार्तादिकर्मसु ।
विवाहोपनयाद्येषु भवाम सहकारिणः ॥ ९३ ॥
परस्परं हि कुर्वाणा विवाहाद्यात्तबान्धवाः ।
निर्मत्सरा भविष्यामः श्राद्धे पित्र्यादिकर्मणि ॥ ९४ ॥
पूर्ववत् प्रतिवत्स्यामो दौर्ब्राह्मण्यादिपातकम् ।
वयमुल्लङ्घयिष्यामो यावत्सत्यमिदं कृतम् ॥ ९५ ॥

117575
26763
015:1E5
G8
UNIVERSITY LIBRARY
28 DEC 1945
MADRAS.

सतां समक्षं सर्वेषां महाबलपुरःस्थिताः ।
घण्टां स्पृशन्तः प्रत्येकं सत्यं ते सागरा व्यधुः ॥ ९६ ॥
देवदुन्दुभयो नेदुरासीद् वागशरीरिणी ।
कोलेशं प्रति विप्रांश्च सर्वेषां तत्र शृण्वताम् ॥ ९७ ॥
साधूदयमहाराज ! साधु हे ब्राह्मणाश्चिरम् ।
समं तिष्ठत नोचेद् वः पूर्वपापं भवेदिति ॥ ९८ ॥
तावत् प्रमुदिताः सन्तः सत्सभा स च पार्थिवः ।
विस्मिताश्च प्रशंसन्तो जग्मुः सर्वे यथागतम् ॥ ९९ ॥
स राजोदयवर्माथ महाबलपुरो बहु ।
उपहृत्य धनं भक्त्या तुष्टावेत्थं तमीश्वरम् ॥ १०० ॥
नमस्ते पार्वतीनाथ! नमस्ते करुणानिधे ! ।
नमस्ते त्रिजगन्नाथ! नमस्ते परमेश्वर! ॥ १०१ ॥
नमस्तुभ्यं भगवते ब्रह्मणे परमात्मने ।
सच्चिदानन्दरूपाय प्रत्यग्रूपाय ते नमः ॥ १०२ ॥
नमस्ते त्रिदशेशाय नमस्ते विश्वयोनये ।
ब्रह्मादिस्तम्बपर्यन्तजगज्जीवात्मने नमः ॥ १०३ ॥
ओङ्कारार्थाय ते विश्वतैजसे प्राज्ञरूपिणे ।
ब्रह्मविष्ण्वीशरूपाय बिन्दुनादात्मने नमः ॥ १०४ ॥
विश्वात्मने विश्वसृजे विराड्रूपाय साक्षिणे ।
प्रणवाद्याक्षरार्थाय तेऽकाराय नमो नमः ॥ १०५ ॥
विष्णवे सूत्ररूपाय साक्षिणे तैजसात्मने ।
ते द्वितीयाक्षरार्थाय ह्युकाराय नमो नमः ॥ १०६ ॥

तद्देशनवकस्येयं सीमा विप्राः सुरोपमाः ।
सम्पद्भिः स्वर्गतुल्यासीत् कोलभूः शृणु सुप्रभ! ॥ ११८ ॥
भाषावेषादिकं सर्वमाचारं चोदयो नृपः ।
लक्ष्मीग्रामद्विजश्रेष्ठैस्तुल्यं तेषामकल्पयत् ॥ ११९ ॥
स्मार्तांश्च वैदिकांश्चैषां स्वानीतानां द्विजन्मनाम् ।
कल्पयामास भूपोऽयं लक्ष्मीग्रामद्विजोत्तमान् ॥ १२० ॥
यज्ञं हैरण्यगर्भं च महादानानि धर्मवित् ।
यथाविधि वितन्वानो बहुधर्मसमार्जनात् ॥ १२१ ॥
लक्ष्मीग्रामद्विजश्रेष्ठैः स्वानीतैस्तैर्द्विजैरपि ।
भुक्त्वा भोगांश्चिरं राजा चोदयोऽपि दिवं ययौ ॥ १२२ ॥
ततः कोलद्विजास्त्वेते स्वर्गते चोदये नृपे ।
सर्वतः केरले व्याप्ता उपजीवन्ति देवलाः ॥ १२३ ॥
वल्लभेशार्चनाद् ग्रामत्यागाच्चैते हि देशिनः ।
स्वग्रामेषु न गृह्यन्ते शिष्टग्रामद्विजोत्तमैः ॥ १२४ ॥
कोलभूपोदयकृतं विप्रस्थापनमुत्तमम् ।
मयोक्तं सुप्रभाशेषं यत् पृष्टोऽहमिह त्वया ॥ १२५ ॥
इत्युक्त्वा नारदोऽगच्छत् सत्यलोकं महामुनिः ।
सुप्रभो विस्मितः सोऽपि ययौ चित्ररथालयम् ॥ १२६ ॥
एवं सूतवचः श्रुत्वा विप्रा वेदपरायणाः ।
विस्मितास्तं प्रशंसन्तो जग्मुस्तेऽपि यथागतम् ॥ १२७ ॥

इति श्रीकेरलमाहात्म्ये कोलराष्ट्रवर्णने
उदयवर्मचरिते ब्रह्मप्रतिष्ठा नाम
प्रकरणं सम्पूर्णम् ॥

---

